# ईशावास्योपनिषद्

**(पदच्छेद-अन्वय-पदार्थ - शाङ्करभाष्याद्युपेता)**

**सम्पादकः**
**डॉ० दयानन्दपाणिग्राही**
सहायकाचार्यः विभागाध्यक्षश्च
अद्वैतवेदान्तविभागः
कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः,
हेंडिया,पूर्वमेदिनीपुरम्,पश्चिमवङ्गः -७२१४३०

सङ्कृतिप्रकाशनम्
पुरी

# ईशावास्योपनिषद्

**डॉ०दयानन्दपाणिग्राहिणा** सम्पादिता

# *Isavasyopanishad*

***edited by***

***Dr. Dayananda Panigrahi***

प्रकाशकः - **साम्विदाम्प्रकाशनम्**

***Publisher*** **-** SAMVIDI
Mahodadhi Market, Chandan Hajuri Road,
Puri - 752001 (Odisha),

© **सर्वं स्वत्वं सम्पादकाधीनम्**

प्रथमप्रकाशनम् - २८-०४-२०२४
First Edition - **28-04-2024**

प्रतयः - 500
Copies - 500

मूल्यम् - 50/-
Price - 50/-

*Type Set by :* Dr. Sakuntala Dash
Nuagarh Basti,Old Sadarthana Road
Puri - 752001, (Orissa)

*Printed at :* HP Printers
Puri-752001 (Odisha),

E-content - Self study material prepared for students by
Dr. Dayanana Panigrahi

ॐ नमो ब्रह्मादिभ्यो
ब्रह्मविद्यासम्प्रदायकर्तृभ्यो
वंशऋषिभ्यो नमो गुरुभ्य:।
ईश केन कठ प्रश्न मुण्ड माण्डूक्य तित्तिरि: ।
ऐतरेयं च छान्दोग्यं बृहदारण्यक तथा ।।

| | |
|---|---|
| **ईशावास्योपनिषत्** | **शुक्लयजुर्वेद:** |
| केनोपनिषत् | सामवेद: |
| कठोपनिषत् | कृष्णयजुर्वेद: |
| प्रश्नोपनिषत् | अथर्वणवेद: |
| मुण्डकोपनिषत् | अथर्वणवेद: |
| माण्डूक्योपनिषत् | अथर्वणवेद: |
| तैत्तिरीयोपनिषत् | कृष्णयजुर्वेद: |
| ऐतरेयोपनिषत् | ऋग्वेद: |
| छान्दोग्योपनिषत् | सामवेद: |
| बृहदारण्यकोपनिषत् | शुक्लयजुर्वेद: |

एतासां दशोपनिषदां भाष्यम् आचार्यै: कृतम्, श्वेताश्वतरस्यापि कृतमिति प्रतीति: ।

❖❖❖

| उपनिषत् | वेद: | महावाक्यम् |
|---|---|---|
| ऐतरेयोपनिषत् | ऋग्वेद: | प्रज्ञानं ब्रह्म |
| बृहदारण्यकोपनिषत् | यजुर्वेद: | अहं ब्रह्माऽस्मि |
| छान्दोग्योपनिषत् | सामवेद: | तत्त्वमसि |
| माण्डूक्योपनिषत् | अथर्वणवेद: | अयमात्मा ब्रह्म |

आद्यमहावाक्यद्वयं प्रज्ञानं ब्रह्म-तत्त्वमसि उपदेशवाक्यत्वेन अवशिष्टवाक्यद्वयम् अहं ब्रह्माऽस्मि-अयमात्मा ब्रह्म अनुभवरूपत्वेन ग्रहणीयम् ।

❖❖❖

## शुक्लयजुर्वेदीय-ईशावास्योपनिषदि

०१) शान्तिपाठः
०२) उपक्रमणम्
०३) प्रथममन्त्रः
०४) द्वितीयमन्त्रः
०५) तृतीयमन्त्रः
०६) चतुर्थमन्त्रः
०७) पञ्चममन्त्रः
०८) षष्ठमन्त्रः
०९) सप्तममन्त्रः
१०) अष्टममन्त्रः
११) नवममन्त्रः
१२) दशममन्त्रः
१३) एकादशमन्त्रः
१४) द्वादशमन्त्रः
१५) त्रयोदशमन्त्रः
१६) चतुर्दशमन्त्रः
१७) पञ्चदशमन्त्रः
१८) षोडशमन्त्रः
१९) सप्तदशमन्त्रः
२०) अष्टादशमन्त्रः

❖❖❖

# ईशावास्योपनिषद्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।
ॐ शान्तिः ! शान्तिः !! शान्तिः !!!

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम् ।।०१।।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ् समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।०२।।

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ।।०३।।

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठ -
त्तस्मिन्नपो मातरिश्वा दधाति ।।०४।।

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ।।०५।।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।०६।।

यस्तु सर्वाणि भूतानि आत्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।०७।।

स पर्यगाच्छुक्रमकायमव्रण
मस्नाविरँ्शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यस्समाभ्यः ।।०८।।

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाँ्रताः ।।०९।।

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये न स्त(द्वि)द्व्याचचक्षिरे ।।१०।।

विद्यां चाविद्यां च यस्तद्वेदोभयँ्सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।११।।

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याँ्रताः ।।१२।।

अन्यदेवाहुस्संभवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये न स्त(द्वि)द्व्याचचक्षिरे ।।१३।।

सम्भूतिं च विनाशं च यस्तद्वेदोभयँ् सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ।।१४।।

हिरण्मयेन पात्रेण सत्यस्याऽपिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।।१५।।

पूषन्नेकर्षे यमसूर्यप्राजापत्य व्यूहरश्मीन् समूह
तेज: यत्ते रूपं कल्याणतमं तत्ते पश्यामि
योऽसावसौ पुरुष: सोऽहमस्मि ।।१६।।

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।
ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ।।१७।।

अग्ने नय सुपथा राये अस्मा
न्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।।१८।।

ॐ पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।
ॐ शान्ति: ! शान्ति: !! शान्ति: !!!

## शान्तिपाठः

*ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।*
*पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।*

**पदच्छेदः** - ॐ पूर्णम्-अदः, पूर्णम्-इदं, पूर्णात्-पूर्णम्-उदच्यते, पूर्णस्य-पूर्णम्-आदाय-पूर्णम्-एव-अवशिष्यते ।

**अन्वयः** - अदः पूर्णम्, इदं पूर्णम्, पूर्णात् पूर्णम् उदच्यते, पूर्णस्य पूर्णम् आदाय पूर्णम् एव अवशिष्यते ।

**पदार्थः** - ॐ, अदः - तत् जगत्कारणं परब्रह्म पूर्णम् - परिपूर्णम् स्वयं सम्पूर्णञ्च अस्ति । इदं – जगत् (ब्रह्मणः कार्यरूपं), पूर्णम्- अपि परिपूर्णमस्ति, पूर्णात् - तत्परब्रह्मणः, पूर्णम् - अस्य जगतः, उदच्यते उत्पत्तिः जायते। (यतो वा इमानि भूतानि जायन्ते इति श्रुतिः।) पूर्णस्य प्रलयावस्थायां पूर्णकार्यस्य पूर्णम्- पूर्णत्वम् आदाय स्वात्मनि विलीय, पूर्णम् - पूर्णं परब्रह्म, एव अवशिष्यते एव अवशिष्टं भवति । ॐ शान्तिः शान्तिः शान्तिः आधिभौतिकस्य आधिदैविकस्य आध्यात्मिकतापस्य च शान्तिः प्रार्थितास्ति।

सरलार्थः - अयं मन्त्रः बृहदारण्यकोपनिषदः पञ्चमाध्यायस्य प्रथमब्राह्मणस्य प्रथमकण्डिकायाः पूर्वार्धः। तस्याः अपि उपनिषदः अयमेव शान्तिमन्त्रः । शुक्लयजुर्वेदीयोपनिषदां शान्तिमन्त्रः अयमेव वर्तते । मन्त्रेऽस्मिन् परब्रह्मणः पूर्णता वर्णितास्ति। ''ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः'' इति गीतावचनानुसारं प्रणवः परब्रह्मणः वाचकः।योगसूत्रमपि - तस्य वाचकः प्रणवः इत्युपदिशति। ॐ इत्यस्य

परब्रह्मवाचकत्वमपि श्रूयते माण्डूक्यभाष्ये प्रथममन्त्रव्याख्यानावसरे - ''ओमित्येतदक्षरमिदं सर्वमिति । यदिदम् अर्थजातमभिधेयभूतम्, तस्य अभिधानाव्यतिरेकात्, अभिधानभेदस्य च ओङ्काराव्यतिरेकात् ओङ्कार एवेदं सर्वम्। परं च ब्रह्म अभिधानाभिधेयोपायपूर्वकमवगम्यत इत्योङ्कार एव।'' अत: ॐ इत्यनेन परब्रह्मस्मरणपूर्वकं मङगलमित्यप्याचर्यते।

अद्वैतिनां मतेन सच्चिदानन्दरूपं ब्रह्म । नित्य-शुद्ध-बुद्ध-मुक्तस्वभावयुक्तं ब्रह्म यदा मायोपहितं भवति तदा स्वसंकल्पेन जगत: सृष्टिस्थितिविनाशव्यापारं करोति । अत: जगज्जन्मादिकारणत्वरूपेण ब्रह्मण: तटस्थलक्षणमुदीरितम् । श्रुतिश्च –यतो वा इमानि भूतानि जायन्ते इत्यादि । न केवलं जगत्कारणं ब्रह्म निमित्तञ्चापि ब्रह्मैव। तत्रापि श्रुति: – यथोर्णनाभि: सृजते गृहणते च इत्यादि प्रमाणम् । कार्यकारणत्वेन ब्रह्मजगतो: अनन्यत्वमेव श्रुते: तात्पर्यं तथा सूत्रकृद्भाष्यकारयोरप्याशय:। प्रमुखरूपेणाभेददर्शनाय तथा कार्यकारणयोरनन्यत्वं प्रदर्शनाय वेदान्तेष्वेतदेव प्रतिपाद्यते। अयमेवार्थ: शान्तिमन्त्रे अत्रोपदिश्यते। अमुमेवार्थं विज्ञानेन उपनिषद: अस्या: अर्थोपि प्रकाश्यते।

'पूर्णमद:...' इति श्रुति: जगत: कारणब्रह्मण: निर्देशं करोति । सर्वतोभावेन तत्परिपूर्णम् इदं जगदपि तेन परब्रह्मणा परिपूर्णमस्ति । यत: 'ऐदमात्म्यमिदं सर्वम्' (छान्दोग्योपनिषद्) इति श्रुति: जगत् ब्रह्मात्मकं तथा पूर्णञ्च इति प्रतिपादयति । पूर्णब्रह्मण: जगत: आविर्भाव: । पूर्णब्रह्मण: पूर्णतां नीत्वा जगत: आविर्भावे अपि ब्रह्म पूर्णमेव तिष्ठति । यथा आचार्यस्य पूर्णां विद्यां गृहीत्वा शिष्य: पूर्णविद्वान् भवति परन्तु आचार्यस्य विद्या तथैव परिपूर्णा तिष्ठति तथैव परब्रह्मण: पूर्णता तथा जगति तदात्मकता। एतदनुसन्धित्सु: विद्वान् भौतिक-दैविक-दैहिकसन्तोषेभ्य: विमुक्त: भवति।

❖❖❖

# ईशावास्योपनिषद्भाष्योपक्रमणिका

## मन्त्राणामीशादिविनियोग:

**शाङ्करभाष्यम्**

ईशावास्यमित्यादयो मन्त्रा: कर्मसु अविनियुक्ता:, तेषामकर्मशेषस्यात्मन: याथात्म्यप्रकाशकत्वात् । याथात्म्यं च आत्मन: शुद्धत्वापापविद्धत्व-एकत्वनित्यत्वाऽशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुद्ध्यते इति युक्त एव एषां कर्मसु अविनियोग: ।

न हि एवं लक्षणमात्मन: याथात्म्यम् उत्पाद्यं विकार्यम् आप्यं संस्कार्यं वा, कर्तृ-भोक्तृ-रूपं वा - येन कर्मशेषता स्यात् । सर्वासामुपनिषदाम् आत्मयाथात्म्यनिरूपणेनैव उपक्षयात् । गीतानां मोक्षधर्माणां च एवं परत्वात् ।

तस्मादात्मन: अनेकत्व-कर्तृत्व-भोक्तृत्वादि च अशुद्धत्व-पापविद्धत्वादि च उपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि ।

**कर्मणि कस्य अधिकार: —**

यो हि कर्मफलेन अर्थी दृष्टेन ब्रह्मवर्चसादिना अदृष्टेन स्वर्गादिना च, द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवान् इति आत्मानं मन्यते सोऽधिक्रियते कर्मसु इति हि अधिकारविदो वदन्ति ।

**अनुबन्धचतुष्टयम् —**

तस्मादेते मन्त्रा: आत्मन: याथात्म्यप्रकाशनेन आत्मविषयकं स्वाभाविकम् अविज्ञानं निवर्तयन्त: शोकमोहादिसंसार-धर्मविच्छित्तिसाधनम् आत्मैकत्वादिविज्ञानम् उत्पादयन्ति ।

इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनात् मन्त्रान् संक्षेपत: व्याख्यास्याम: ।

## सकलवेदवेदान्तसारब्रह्मतत्त्वोपदेशः

***ॐईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।***
***तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।।० १।।***

**पदच्छेदः** - ईशा-वास्यम्-इदं-सर्वं-यत्-किं-च-जगत्यां-जगत्-तेन-त्यक्तेन-भुञ्जीथाः- मा-गृधः- कस्य-स्वित्-धनम् ।
**अन्वयः** - जगत्यां यत्किञ्च जगत् (तत्) इदं सर्वं ईशावास्यम्, तेन त्यक्तेन भुञ्जीथाः मागृधः कस्यस्वित् धनम् ।
**पदार्थः** -जगत्याम् - सम्पूर्णे अपि ब्रह्माण्डे, यत् किं च जगत् यत् किञ्चित् - स्थावरजङ्गमात्मकं वर्तते जडचेतनरूपं वा वर्तते, इदं सर्वम् - तत् सर्वम् ईशा - सर्वशक्तिमता परमात्मना, वास्यम्-आच्छादनीयम् आच्छादितं परिव्याप्तमित्यर्थः। तेन - अतः तस्मात् कारणात् वा, त्यक्तेन - त्यागभावनया, भुञ्जीथाः - उपभोगः करणीयः पालयेथाः वा, कस्यस्वित् - कस्यापि परस्य स्वस्य वा, धनं - सम्पत्तिं, मा गृधः - नेतुं माभिलाषं कुरु मा आकांक्षां कार्षीः इति।
**शाङ्करभाष्यम् –**

- **ईशा** ईष्टे इति ईट्, तेन ईशा ।
- ईशिता परमेश्वरः परमात्मा सर्वस्य ।
- स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् प्रत्यगात्मतया ।
- तेन स्वेन स्वरूपेण आत्मना ईशा **वास्यम्** आच्छादनीयम् ।
- किम्? **इदं सर्वम्** ।
- **यत्किञ्च** यत्किञ्चित् **जगत्यां** पृथिव्यां **जगत्** सर्वम् ।
- स्वेन आत्मना ईशेन प्रत्यगात्मतया अहमेव इदं सर्वं इति परमार्थसत्यरूपेण अनृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना ।
- यथा चन्दनागर्वादेः उदकादिसंबन्धजक्लेदादिजम् औपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन ।
- तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वलक्षणादिकं

जगत् द्वैतरूपं **जगत्यां** पृथिव्याम् - जगत्याम् इति उपलक्षणार्थत्वात् - सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात् ।

**आत्मनिष्ठस्य त्याग एवं अधिकारः** —

- एवम् ईश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु ।
- **तेन त्यक्तेन** त्यागेनेत्यर्थः ।
- न हि त्यक्तो मृतः पुत्रो वा भृत्यो वा आत्मसम्बन्धिताया अभावात् आत्मानं पालयति ।
- अतः त्यागेन इत्ययमेववेदार्थः ।
- **भुञ्जीथाः** पालयेथाः ।
- एवं त्यक्तैषणस्त्वं **मा गृधः** गृधिमाकाङ्क्षां मा कार्षीः धनविषयाम्
- **कस्यस्विद्धनं** कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीः इत्यर्थः।
- स्वित् इति अनर्थको निपातः ।
- अथवा मा गृधः । कस्मात्?
- कस्यस्विद्धनम् इत्यक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत ।
- आत्मैव इदं सर्वम् इति ईश्वरभावनया सर्वं त्यक्तम् ।
- अतः आत्मन एव इदं सर्वम् आत्मैव च सर्वम्
- अतः मिथ्याविषयां गृधिं मा कार्षीः इत्यर्थः ।।१।।

❖❖❖

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेन आत्मज्ञाननिष्ठतया आत्मारक्षितव्य इत्येष वेदार्थः ।

अथ इतरस्य आनात्मज्ञतया आत्मग्रहणाय अशक्तस्य इदम् उपदिशति मन्त्रः —

## आत्मग्रहाणाशक्तस्य कर्मोपदेश:

*कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समा: ।*
*एवं त्वयिनान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।० २।।*

**पदच्छेद:** - कुर्वन्-एव-इह-कर्माणि-जिजीविषेत्-शतं-समा:-एवं-त्वयि-न-अन्यथा-अस्ति-न-कर्म-लिप्यते-नरे ।

**अन्वय:** - इह कर्माणि कुर्वन्नेव शतं समा: जिजीविषेत्, एवं (जिजीविषति) त्वयि नरे कर्म न लिप्यते, इत: अन्यथा नास्ति ।

**पदार्थ:**- इह -अस्मिन् लोके संसारे वा, कर्माणि कुर्वन्- अग्निहोत्रादीनि धर्मानुमोदितानि वेदोक्तानि कर्माणि समाचरन् एव निश्चयेन, शतं समाः — शतसंख्यकान् सम्वत्सरान् जिजीविषेत् जीवितुमिच्छेत् त्वयि नरे एवं जीवितुम् इच्छति नरे, कर्म -अग्निहोत्राद ानि सम्पादितानि कर्माणि, न लिप्यते संसारबन्धनहेतुभूतानि न भवन्ति बारम्बारम् आवागमनस्य कारणानि न भवन्ति, इतः कर्माणि कुर्वतः वर्तमानात् प्रकारात् अन्यथा — प्रकारान्तरं, न अस्ति न विद्यते इति।

**शाङ्करभाष्यम् –**

- **कुर्वन्नेव** इह निवर्तयन्नेव
- **कर्माणि** अग्निहोत्रादीनि
- **जिजीविषेत्** जीवितुमिच्छेत्
- **शतं** शतसंख्याका:
- **समा:** संवत्सरान्
- तावद्धि पुरुषस्य परमायुर्निरूपितम् ।
- तथा च प्राप्तानुवादेन यज्जिजीविषेत् शतं वर्षाणि
- तत् कुर्वन्नेव कर्माणि इत्येतत् विधीयते ।
- **एवम्** एवं प्रकारेण **त्वयि** जिजीविषति

- **नरे** नरमात्राभिमानिनि
- **इत** एतस्मात् अग्निहोत्रादीनि कर्माणि कुर्वत:,
- वर्तमानात् प्रकारात् **अन्यथा** प्रकारान्तरं **न अस्ति**,
- येन प्रकारेण अशुभं **कर्म न** लिप्यते, कर्मणा न **लिप्यत** इत्यर्थ: ।
- अत: शास्त्रविहितानि कर्माणि अग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् ।

**ज्ञानकर्मसमुच्चयखण्डनम्** -

कथं पुनरिदम् अवगम्यते पूर्वेण संन्यासिनो ज्ञाननिष्ठा उक्ता
द्वितीयेन तदशक्तस्य कर्मनिष्ठा इति ।
उच्यते; ज्ञानकर्मणो: विरोधं पर्वतवत् अकम्प्यं
यथोक्तं न स्मरसि किम्?
इहापि उक्तम् —
**'यो हि जिजीविषेत् स कर्म कुर्वन्'**
**'ईशावास्यमिदं सर्वम्'**
**'तेन त्यक्तेन भुञ्जीथा:'**
**'मा गृध: कस्यस्विद्धनम्'** इति च ।
**'न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदम्,**
**ततो न पुनरियात्'** इति संन्यासशासनात् ।
उभयो: फलभेदं च वक्ष्यति ।

इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवत:
क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण ।
निवृत्तिमार्गेण एषणात्रयस्य त्याग: ।
तयो: संन्यासपथ एवातिरेचयति ।
'न्यास एवात्यरेचयत्' इति च तैत्तिरीयके ।
**द्वाविमावथ पन्थानौ यत्र वेदा: प्रतिष्ठिता: ।**
**प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभावित: ।।**

(महा०शा० २४१-६)

इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता ।
विभागञ्चानयोः दर्शयिष्यामः ॥२॥

❖❖❖

**अज्ञानस्य निन्दा** -

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्रः आरभ्यते —

***असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।***
***तां स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥० ३ ॥***

**पदच्छेदः** - असुर्याः-नाम-ते-लोकाः-अन्धेन-तमसा-आवृताः-तान्-ते-प्रेत्य-अभिगच्छन्ति-ये-के-च-आत्महनः-जनाः

**अन्वयः** - अन्धेन तमसा आवृता लोकाः ते असुर्या नाम, ये के च आत्महनः जनाः, ते प्रेत्य तान् अभिगच्छन्ति ।

**पदार्थः** - ते असुर्याः - अरूपपरमात्मभावमुपेक्ष्ये देवता अपि असुराः तेषां स्वभूताः निवासाः असुर्याः, नाम अर्थहीन अव्ययपदम् लोकाः यत्र कर्मफलानां लोकनं दर्शनं भोगं वा भवति मर्त्यजन्मानि इति, अन्धेन तमसा अदर्शनात्मकेन अज्ञानेन अन्धकारेण, आवृताः — आच्छादितानि भवन्ति, ये के च ये के आत्मज्ञानरहिताः अविद्वांसः, आत्महन जनाः ते -आत्मानं घ्नन्तीति ते अज्ञानिनः, प्रेत्य प्रकर्षेण एत्य अस्मात्मत्र्यलोकात्मृत्युद्वारा प्रकर्षेण गत्वा इति, तान्-तान्पूर्वोक्तान्आत्मज्ञानरहितान्लोकान् अभिगच्छन्ति (पुनः) प्राप्नुवन्ति ।३

**शाङ्करभाष्यम् –**

- **असूर्याः** परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः
- तेषाञ्च सम्भूता लोका असुर्यानाम । **नाम**-शब्दोऽनर्थको निपातः ।
- **ते लोकाः** कर्मफलानि ।

- लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि ।
- **अन्धेन** अदर्शनात्मकेन अज्ञानेन **तमसा आवृता** आच्छादिता: ।
- **तान्** स्थावरान्तान् **प्रेत्य** त्यक्त्वा इमं देहम्
- **अभिगच्छन्ति** यथा कर्म यथा श्रुतम् ।
- आत्मानं घ्नन्ति इति **आत्महनः** ।
- **के ते जनाः ये** अविद्वांस: ।
- कथं त आत्मानं नित्यं हिंसन्ति ।
- अविद्यादोषेण विद्यमानस्यात्मन: तिरस्करणात् ।
- विद्यमानस्य आत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं
- तद्धतस्येव तिरोभूतं भवति इति
- प्राकृत-अविद्वांसो जना आत्महन उच्यन्ते ।
- तेन ह्यात्महननदोषेण संसरन्ति ते ।।३।।

❖❖❖

**आत्मस्वरूपम्**-

यस्य आत्मन: हननात् अविद्वांस: संसरन्ति
तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते न आत्महन:
तत् कीदृशम् आत्मतत्त्वम् इत्युच्यते —

***अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।***
***तद्धावतोऽन्या नत्येतितिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।०४।।***

**पदच्छेदः** - अनेजत्-एकं- मनसः- जवीयः-न-एनत्-देवाः-आप्नुवन् पूर्वं-अर्षत्-तत्-धावतः-अन्यान्-अत्येति-तिष्ठत्-तस्मिन्-अपः-मातरिश्वा दधाति ।

**अन्वयः** - अनेजत् एकं मनसो जवीय:, एनत् देवा न आप्नुवन् (यत्) पूर्वम् अर्षत्, तत् तिष्ठत् धावत: अन्या नत्येति । मातरिश्वा तस्मिन् (सति) अप: दधाति ।

**पदार्थः** - अनेजत्- न एजत्(एजृ कम्पने) न कम्पनं न चलनम्अविचलितमित्यर्थः, एकम्- सदैव एकरूपम् मनसः जवीयः संकल्पादिलक्षणात्मनसः वेगवत्तरम्इति, पूर्वमर्षत्- सर्वव्यापकत्वात्प्रतिदेहं प्रत्यवभासकम् अनत्एतत्आत्मतत्त्वं, देवाः द्योतनात्चक्षुरादीनीन्द्रियाणि,

न आप्नुवन्न प्राप्तवन्तः, तत्तिष्ठत्तत्आत्मतत्त्वं स्वयमविक्रियं सत् धावतः अन्यान्- द्रुतं गच्छतः अन्यान्अनात्मभूतानि मनोवागिन्द्रियादीनि अत्येति -अतीत्य अतिक्रम्य वा गच्छति, तस्मिन्आत्मतत्त्वे नित्यचैतन्यस्वभावे, मातरिश्वा -मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा सर्वप्राणात्मकः वायुः, अपः कर्माणि देवानां प्राणीनां च चेष्टालक्षणानि, दधाति - विधारयति इति । ४

**शाङ्करभाष्यम् –**

- **अनेजत्** न एजत् ।
- एजृ कम्पने, कम्पनं चलनं स्वावस्थाप्रच्युतिः
- तद्वर्जितं सर्वदैकरूपमित्यर्थः ।
- तच्चैकं सर्वभूतेषु **मनसः** सङ्कल्पादि लक्षणाद् **जवीयो** जववत्तरम् ।
- कथं विरुद्धमुच्यते ध्रुवं निश्चलमिदं मनसो जवीय इति च ।
- नैष दोषः निरुपाध्युपाधिमत्त्वेनोपपत्तेः ।
- तत्र निरुपाधिकेन स्वेन रूपेणोच्यते अनेजदेकमिति मनसोऽन्तःकरणस्य ।
- सङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्तनाद्
- इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं
- सङ्कल्पेनक्षणमात्राद्भवति
- इत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम् ।
- तस्मिन् मनसि ब्रह्मलोकादीन् द्रुतं गच्छति सति
- प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यते
- अतः मनसो जवीय इत्याह ।
- **नैनद्देवा** द्योतनात् देवाः चक्षुरादीनि इन्द्रियाणि एव
- तत् प्रकृतात्मतत्त्वं न **आप्नुवन्** न प्राप्तवन्तः ।
- तेभ्यो मनो जवीयः मनोव्यापारव्यवहितत्वाद्
- आभासमात्रमपि आत्मनो नैव देवानां विषयी भवति ।
- यस्मात् जवनात् मनसोऽपि
- **पूर्वमर्षत्** पूर्वमेव गतं व्योमवत् व्यापित्वात्

- सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं
- स्वेन निरुपाधिकेन स्वरूपेण
- अविक्रियमेव सकृदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीति
- अविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह ।
- **तद्धावतो** द्रुतं गच्छतः
- **अन्यान्** आत्मविलक्षणान् मनोवागिन्द्रियप्रभृतीन्
- **अत्येति** अतीत्य गच्छति इव ।
- इवार्थं स्वयमेव दर्शयति **तिष्ठत्** इति स्वयमक्रियमेव सदित्यर्थः।
- **तस्मिन्** आत्मतत्त्वे सति नित्यचैतन्यस्वभावे
- **मातरिश्वा** मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः
- सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यकरणजातानि
- यस्मिन् ओतानि प्रोतानि च
- यत् सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा;
- **अपः** कर्माणि प्राणिनां चेष्टालक्षणानि,
- अग्नि-आदित्य-पर्जन्यादीनां
- ज्वलन-दहन-प्रकाश-अभिवर्षणादिलक्षणानि
- **दधाति** विभजति इत्यर्थः ।
- धारयतीति वा **भीषास्माद्वातः पवते** (तै०सं० २.८.१) इत्यादिश्रुतिभ्यः ।
- सर्वा हि कार्यकारणादिविक्रिया
- नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥४॥

❖❖❖

न मन्त्राणां जामितास्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह —

***तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।***
***तदन्तरस्य सर्वस्य त दु सर्वस्यास्य बाह्यतः ॥०५॥***

**पदच्छेदः** - तत्-एजति-तत्-न-एजति-तत्-दूरे (अस्ति)-तत्-अन्तिके (अस्ति)-तत्-अन्तः-अस्य-सर्वस्य-तत्-उ-सर्वस्य-अस्य-बाह्यतः ।

**अन्वयः** - तत् एजति, तत् न एजति, तत् दूरे(अस्ति), तत् अन्तिके (अस्ति), तत् अन्य सर्वस्य अन्तः (अस्ति), तत् उ अस्य सर्वस्य अस्य बाह्यतः (अस्ति) ।

**पदार्थः** -तत्- तत्आत्मतत्त्वम् एजति चलति, तत्तत्आत्मतत्वं, न एजति - न चलति स्वतः अचलमेव सत्चलति इव इत्यर्थः। तत्तत्तत्त्वं, दूरे बहुसाधनेन विदुषां कृते पराप्ताव्यत्वात्वर्षकोटिशतैः अपि विदुषाम्अप्राप्यत्वात्दूरे इत्यर्थः। तत् तत्तत्त्वं उ अन्तिके - विदुषां प्राप्तव्यत्वात्निकटे इति, तत्तत्आत्मतत्त्वम् अस्य सर्वस्य - अस्य नामरूपक्रियारूपस्य जगतः, अन्तः आत्मरूपं साररूपं वा, तत्तत्आत्मतत्त्वम् अस्य सर्वस्य नामरूपक्रियात्मकजगतः बहिरपि आकाशवत्व्याप्तमस्ति इति । ५

**शाङ्करभाष्यम् –**

- तदात्मतत्त्वं यत्प्रकृतं
- **तदेजति** चलति
- तदेव च **नैजति** स्वतो नैव चलति
- स्वतः अचलमेव सत् चलति इव इत्यर्थः ।
- किञ्च **तद्दूरे** वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद् दूर इव ।
- तद् उ अन्तिके इति च्छेदः ।
- **तद्वन्तिके** समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च ।
- तदन्तरमभ्यन्तरे अस्य सर्वस्य
- **य आत्मा सर्वान्तरः** (बृ०उ० ३.४.१) इति श्रुतेः
- अस्य सर्वस्य जगतः नाम रूपक्रियात्मकस्य
- **तदु** अपि **सर्वस्य**
- **अस्य बाह्यतो** व्यापकत्वात् आकाशवत्
- निरतिशयसूक्ष्मत्वात् अन्तः ।
- प्रज्ञानघन एव (बृ०उ० ४.५.१३)
- इति च शासनात् निरन्तरं च ।।५।।

❖❖❖

अभेददर्शिनः मुमुक्षोः स्थितिः -

***यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।***
***सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।०६।।***

**पदच्छेदः** - यः-तु-सर्वाणि-भूतानि-आत्मनि-एव-अनु-पश्यति-सर्वभूतेषु-च-आत्मानं-ततः-न-विजुगुप्सते ।

**अन्वयः** - यस्तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति ।
सर्वभूतेषु च आत्मानं अनुपश्यति ।
ततः (सः) न विजुगुप्सते ।

पदार्थः - यः यः मुमुक्षुपुरुषः, तु निश्चयार्थम्अव्ययम् सर्वाणि भूतानि - चेतनाचेतनानि --- तथा, स्थावरजङ्गमान्तानि, आत्मनि आत्मतत्वे स्वस्य आत्मनि वा, एव - निश्चित्य, सर्वभूतेषु तेषु चराचरात्मकेषु चेतनाचेतनेषु, आत्मानं आत्मतत्त्वं सर्वसाक्षिरूपं, च अनुपश्यति - पश्यति एवं दृष्टिसम्पन्नः भवति, ततः तस्मात्कारणात् न विजुगुप्सते -घृणां न करोति । ६

**शाङ्करभाष्यम् –**

- **यः** परिव्राड् मुमुक्षुः
- **सर्वाणि भूतानि** अव्यक्तादीनि स्तावरान्तानि आत्मन्येवानुपश्यति ।
- आत्मव्यतिरिक्तानि न पश्यति इत्यर्थः ।
- सर्वभूतेषु च तेष्वेव चात्मानं
- तेषाम् अपि भूतानां स्वमात्मानमात्मत्वेन
- यथास्य देहस्य कार्यकरणसङ्घातस्य आत्मा
- अहं सर्वप्रत्ययसाक्षिभूतः
- चेतयिता केवलो निर्गुणः

- अनेनैव स्वरूपेण
- अव्यक्तादीनां स्थावरान्तानाम्
- अहमेव आत्मेति
- सर्वभूतेषु च आत्मानं निर्विशेषं
- य: तु अनुपश्यति स तत: तस्मादेव दर्शनात्
- **न विजुगुप्सते** विजुगुप्सां घृणां न करोति ।
- प्राप्तस्यैव आनुवादोऽयम् ।
- सर्वा हि घृणात्मनोऽन्यद्दुष्टं पश्यतो भवति,
- आत्मानमेव अत्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तम्
- अर्थान्तरमस्तीति प्राप्तमेव ।
- ततो न विजुगुप्सत इति ।।६।।

❖❖❖

इममेवार्थम् अन्योऽपि मन्त्र आह —

***यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानत: ।***
***तत्र को मोह: क: शोक एकत्वमनुपश्यत: ।।०७।।***

**पदच्छेद:** - यस्मिन्-सर्वाणि-भूतानि- आत्मा-एव-अभूत्-विजानत:-तत्र-क:-मोह:-क:-शोक:- एकत्वम्-अनु-पश्यत: ।

**अन्वय:** - विजानत: यस्मिन् सर्वाणि भूतानि आत्मैव अभूत्, एकत्वमनुपश्यत: । तत्र क: मोह:? क: शोक:?

**पदार्थ:** - यस्मिन्- यदा यस्मिन्काले वा, विजानतः आत्मज्ञानिनः कृते, सर्वाणि भूतानि चेतनाचेतनानि चराचराणि, आत्मा एव आत्मतत्त्वरूपेण अनुभूतानि, आभूत्-जातानि आभवन्वा, तत्र तदा तस्मिन्काले आत्मानुभवादनन्तरमिति अर्थः, एकत्वम्-सर्वत्र एकात्मत्वम् अनुपश्यतः दर्शनशीलस्य अनुभवशीलस्य मुमुक्षोः, कः मोहः - ममत्वपरत्वबोधः, शोकः मदीयत्वहानौ दुःखम्इति । ७

**शाङ्करभाष्यम् –**

- **यस्मिन्** काले यथोक्तात्मनि वा
- तान्येव **भूतानि सर्वाणि** परमार्थात्मदर्शनात्
- **आत्मैवाभूद्** आत्मैव संवृतः परमार्थवस्तु **विजानतः**
- **तत्र** तस्मिन् काले तत्र आत्मनि वा
- **को मोहः कः शोकः** ।
- शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति ।
- न तु आत्म-**एकत्वं** विशुद्धं गगनोपमं **पश्यतः** ।
- को मोहः कः शोक इति
- शोकमोहयोरविद्याकार्ययोराक्षेपेण असम्भवप्रदर्शनात्
- सकारणस्य संसारस्य अत्यन्तमेव उच्छेदः प्रदर्शितो भवति ॥७॥

❖❖❖

***स पर्यगाच्छुक्रमकायमव्रण-***
***मस्नाविरँ शुद्धमपापविद्धम् ।***
***कविर्मनीषी परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान्***
***व्यदधाच्छाश्वतीभ्यस्समाभ्यः ॥०८॥***

**पदच्छेदः** - सः-पर्यगात्-शुक्रं-अकायं-अव्रणं-अस्नाविरं-शुद्धम्-अपापविद्धं-कविः-मनीषी-परिभूः-स्वयम्भूः-याथातथ्यतः-अर्थान्-व्यदधात्-शाश्वतीभ्यः-समाभ्यः ।

**अन्वयः** - स पर्यगात् शक्रम् अकायम् अव्रणम् अस्नाविरं शुद्धम् अपापविद्धं कविः मनीषी परिभूः स्वयम्भूः शाश्वतीभ्यः समाभ्यः अर्थान् याथातथ्यतः व्यदधात् ।

**पदार्थः** - सः सः पूर्वोक्तः आत्मा, पर्यगात्सर्वत्र व्याप्तः, शुक्रम् शुद्धः ज्योतिष्कः, अकायम्- अशरीरी लिङ्ङ्गशरीररहितः, अव्रणम्अक्षतः, अस्नाविरम्-स्नायुरहितः, (अव्रणअस्नाविरपदाभ्यां स्थूलशरीरस्य निषेधः), शुद्धं परिशुद्धः अज्ञानरहितः, अपापविद्धम्-पापरहितः, कविः क्रान्तदर्शी, मनीषी मनसः ईषिता सर्वज्ञः इत्यर्थः, परिभूः - परितः भवतीति, स्वयम्भूः स्वयं भवतीति, शाश्वतीभ्यः समाभ्यः - नित्याभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यः, यथातथ्यतः - यथानुरूपम् अर्थान्- कर्त्तव्यपदार्थान् व्यदधात्- विहितवान्व्यभजत्इत्यर्थः।८

**शाङ्करभाष्यम् –**

**आत्मनिरूपणम्**

- योऽयमतीतैः मन्त्रैरुक्त आत्मा
- स स्वेन रूपेण किं लक्षण इत्याह अयं मन्त्रः -
- **स** यथोक्त आत्मा **पर्यगात्**
- परि समन्तात् अगात् गतवान् आकाशवद् व्यापी इत्यर्थः ।
- **शुक्रं** शुद्धं ज्योतिष्मत् दीप्तिमान् इत्यर्थः ।
- **अकायम्** अशरीरो लिङ्गशरीरवर्जित इत्यर्थः ।
- **अव्रणम्** अक्षतम् ।
- **अस्नाविरं** स्नावाः शिरा यस्मिन् न विद्यन्त इति अस्नाविरम् ।
- **अव्रणम् अस्नाविरम्** इत्यभ्यां स्थूलशरीरप्रतिषेधः ।
- **शुद्धं** निर्मलं अविद्यामलरहितम् इति कारणशरीरप्रतिषेधः ।
- **अपापविद्धं** धर्माधर्मादिपापवर्जितम् ।
- शुक्रमित्यादीनि वचांसि पुँल्लिङ्गत्वेन परिणेयानि ।
- स पर्यगात् इत्युपक्रम्य
- कविर्मनीषी इत्यादिना पुँल्लिङ्गत्वेन उपसंहारात् ।
- **कविः** क्रान्तदर्शी सर्वदृक् ।
- नान्योऽतोऽस्ति द्रष्टा (बृ०उ० ३-८-११) इत्यादि श्रुतेः ।
- **मनीषी** मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः ।
- **परिभूः** सर्वेषां पर्युपरि भवतीति पर्यभूः ।

- **स्वयम्भूः** स्वयमेव भवतीति ।
- येषामुपरि भवति यश्चोपरि भवति
- स सर्वः स्वयमेव भवतीति स्वयम्भूः ।
- स नित्यमुक्त ईश्वरो **याथातथ्यतः** सर्वज्ञत्वाद्यथा तथाभावो याथातथ्यं
- तस्माद्यथाभूतकर्मफलसाधनतः
- **अर्थान्** कर्तव्यपदार्थान्
- **व्यदधात्** विहितवान् यथानुरूपं व्यभजत् इत्यर्थः ।
- **शाश्वतीभ्यः** नित्यभ्यः
- **समाभ्यः** संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥०८॥

❖❖❖

**ज्ञानमार्गः - कर्ममार्गः**

- तत्राद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठा उक्ता **प्रथमो वेदार्थः**
- **ईशा वास्यमिदं सर्वं ... मा गृधः कस्यस्विद्धनम्** इति ।
- अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे
- **कुर्वन्नेवेह कर्माणि जिजीविषेत्** इति
- कर्मनिष्ठा उक्ता **द्वितीयो वेदार्थः** ।

**अज्ञानां कर्मनिष्ठा**

- अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोः बृहदारण्यकेऽपि प्रदर्शितः ।
- **सोऽकामयत जाया मे स्यात्** (बृ०उ० १.४.१७)
- इत्यादिना अज्ञस्य कामिनः कर्माणि इति ।
- **मन एवास्यात्मा वाग्जाया** (बृ०उ० १-४-१७)
- इत्यादि वचनाद् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते ।
- तथा च तत्फलं सप्तान्नसर्गः, तेष्वात्मभावेनात्मस्वरूपावस्थानम् । - जायाद्येषणात्रयसंन्यासेन च ज्ञानिनां आत्मविदां कर्मनिष्ठा - प्रातिकूल्येन आत्मस्वरूपनिष्ठैव दर्शिता ।

किं प्रजया करिष्यामो येषां
नोऽयमात्मायं लोकः (बृ०उ० ४-४-२२) इत्यादिना ।

- ये तु ज्ञाननिष्ठाः संन्यासिनः तेभ्यः **असुर्या नाम ते** इत्यादिना
- अविद्वन्निन्दा द्वारेण आत्मनो याथात्म्यं

- **स पर्यगात्** इत्येतदन्तैः मन्त्रैरुपदिष्टम् ।
- ते ह्यत्र अधिकृता न कामिन इति ।
- तथा च श्वेताश्वतराणां मन्त्रोपनिषदि
  अत्याश्रमिभ्यः परमं पवित्रं
  प्रोवाच सम्यगृषिसङ्घजुष्टम् । (श्वे०उ० ६-२१)
  इत्यादि विभज्योक्तम्
- ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवः
- तेभ्यः इदमुच्यते
- **अन्धं तमः** इत्यादि ।

❖❖❖

ब्रह्मतत्त्वज्ञानोपायः विद्या-अविद्या च

***अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।***
***ततो भूय इव ते तमो य उ विद्यायाँ रताः ॥० ९ ॥***

**पदच्छेदः** - अन्धं-तमः-प्रविशन्ति-ये-अविद्याम्-उपासते-ततः-भूयः-इव-ते-तमः-ये-उ-विद्यायां-रताः ।

**अन्वयः** -
ये अविद्याम् उपासते (ते) अन्धं तमः प्रविशन्ति ।
ये उ विद्यायां रताः ते ततः भूय एव तमः प्रविशन्ति ।

**पदार्थः** -
ये ये जनाः, अविद्याम्अग्निहोत्रादिकर्मरूपाम् उपासते - सेवन्ते तत्पराः भवन्ति इत्यर्थः, अन्धं तमः अदर्शनात्मकम्अन्धकारं, प्रविशन्ति-प्रवेशं कुर्वन्ति, ये — ये जनाः, च उ केवलं कर्मोपासनातः अपि, भूयः इव - अधिके अन्धकारे (प्रविशन्ति) इत्यर्थः। ९

**शाङ्करभाष्यम् –**

- कथं पुनरेवमवगम्यते न तु सर्वेषाम् इति । उच्यते —
- अकामिनः साध्यसाधनभेदोपमर्देन

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कःशोक एकत्वमनुपश्यतः ।।

- इति यदात्मैकत्वविज्ञानम् (उक्तम्)
- तत् न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति ।
- इह तु समुच्चिचीषया अविद्वदादिनिन्दा क्रियते ।
- तत्र च यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते
- यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम् ।
- विद्यया देवलोकः (बृ०उ० १-५-१६) इति पृथक्फलश्रवणात् ।
- तयोः ज्ञानकर्मणोः इह एकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव एकैकस्य पृथक्फलश्रवणात् ।
- विद्यया तदारोहन्ति विद्यया देवलोकः (बृ०उ० १-५-१६)
- न तत्र दक्षिणा यन्ति कर्मणा पितृलोकः (बृ०उ० १-५-१६) इति ।
- न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात् ।
- तत्र **अन्धन्तमः** अदर्शनात्मकं तमः प्रविशन्ति ।
- के? **येऽविद्यां** विद्याया अन्या अविद्या तां कर्म इत्यर्थः,
- कर्मणो विद्याविरोधित्वात्, ताम् **अविद्यामग्निहोत्रादिलक्षणाम्** एव
- **केवलामुपासते** तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः ।
- ततस्तस्मादन्धत्मकात्तमसो **भूय इव** बहुतरमेव **ते तमः प्रविशन्ति**,
- के? कर्म हित्वा ये उ ये तु **विद्यायामेव** देवताज्ञान एव रताः अभिरताः ।
- तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह;
- अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गितैव स्याद् इत्यर्थः ।।९।।

❖❖❖

## कर्मोपासनयोः समुच्चयस्य फलम्

***अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।***
***इति शुश्रुम धीराणां ये न स्त(द्वि)द्व्याचचक्षिरे ।।१०।।***

**पदच्छेदः** - अन्यत्-एव-आहुः-अविद्यया-अन्यत्-आहुः-अविद्यया-इति-शुश्रुम-धीराणां-ये-नः-तत्-व्याचचक्षिरे ।

**अन्वयः** - विद्यया (क्रियमाणं फलं) अन्यत् एव (इति) आहुः, नः अविद्यया क्रियमाणं फलम् अन्यत् (इति) आहुः ये तत् व्याचचक्षिरे तेषां धीराणां (उपदेशं) इति शुश्रुम ।

**पदार्थः** - विद्यया - देवताज्ञानेन, अन्यत्अन्यं फलम् एव आहुः उच्यते, अविद्यया -कर्मोपासनया, अन्यत्अन्यं पृथक्वा फलम् आहुः उच्यते, इति धीराणां - एवं धीमताम्आचार्याणां, शुश्रुमः श्रुतवन्तः वयं, ये आचार्याः, नः अस्माकं कृते, तत्-ज्ञानकर्मणोः पृथक्फलं, विचचक्षिरे व्याख्यातवन्तः। १०

**शाङ्करभाष्यम् –**

तत्र अवान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह । अन्यथा फलवदफलवतोः सन्निहितयोः अङ्गाङ्गितायां जामितैव स्यात् इत्यर्थः ।

- **अन्यत्** पृथक् **एव विद्यया** क्रियते फलम् इति **आहुः** वदन्ति
- **विद्यया देवलोकः** (बृ०उ० १-५-१६)
- **विद्यया तदारोहन्ति** इति श्रुतेः ।
- **अन्यत् आहुः अविद्यया** कर्मणा क्रियते,
- **कर्मणा पितृलोकः** (बृ०उ० १-५-१६) इति श्रुतेः ।

- **इति** एवं **शुश्रुम** श्रुतवन्तो वयं **धीराणां** धीमतां वचनम् ।
- **ये** आचार्या **नः** अस्मभ्यं **तत्** कर्म च ज्ञानं च **विचचक्षिरे** व्याख्यातवन्तः
- तेषाम् अयमागमः पारम्पर्यागत इत्यर्थः ।।१०।।

❖❖❖

***विद्यां चाविद्यां च यस्तद्वेदोभयँ् सह ।***

*अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।११।।*

**पदच्छेदः** - विद्यां-च-अविद्यां-च-यः-तत्-वेद-उभयं-सह-अविद्यया-मृत्युं-तीर्त्वा-विद्यया-अमृतम्-अश्नुते ।
**अन्वयः** - विद्यां च अविद्यां च तदुभयं यः सह (अनुष्ठेयं) वेद (सः) अविद्यया मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते ।
**पदार्थः** - यः यः साधकपुरुषः, तत्विद्यां च तत्देवताज्ञानं च, अविद्यां च तत्कर्मानुष्ठानपरकं ज्ञानं, सह वेद एकत्र जानति इति उभयं जानाति वा, (सः सः साधकः), -अविद्यया अग्निहोत्रादिना कर्मणा, मृत्युं तीर्वा स्वाभाविकम्आवागमनं -जन्ममृत्युबन्धनं वा अतिक्रम्य, विद्यया --देवताज्ञानेन तत्त्वज्ञानेन वा, अमृतम्देवतात्मभावम्अमरत्वं मोक्षं वा, अश्नुते प्राप्नोति । ११

**शाङ्करभाष्यम् –**

- यत एवमतो **विद्यां चाविद्यां च** देवताज्ञानं कर्म चेत्यर्थः ।
- **यस्तदेतद् उभयं सह** एकेन पुरुषेण अनुष्ठेयं वेद ।
- तस्यैवं समुच्चयकारिण एव एक पुरुषार्थसम्बन्धः क्रमेण स्यात् इति उच्यते ।

- **अविद्यया** कर्मणा अग्निहोत्रादिना,
- **मृत्युं** स्वाभाविकं कर्म ज्ञानं च,
- मृत्युशब्दवाच्यमुभयं **तीर्त्वा** अतिक्रम्य,
- **विद्यया** देवताज्ञानेन **अमृतं** देवतात्मभावम् **अश्नुते** प्राप्नोति ।
- तद् हि अमृतमुच्यते यद् देवतात्मगमनम् ।।११।।

❖❖❖

ब्रह्मतत्त्वज्ञानोपायः व्याकृत-अव्याकृत उपासने

*अन्धं तमः प्रविशन्ति येऽसम्भूति मुपासते ।*
*ततो भूय इव ते तमो य उ सम्भूत्याँ रताः ।।१२।।*

**पदच्छेद:** - अन्धं-तम:-प्रविशन्ति-ये-असम्भूतिम्-उपासते, तत:-भूय:-इव-ते-तम:-ये-उ-सम्भूत्यां-रता: ।

**अन्वय:** - ये असम्भूतिम् उपासते, ते अन्धं तम: प्रविशन्ति ।
ये उ सम्भूत्यां रता: ते तत: भूय इव तम: प्रविशन्ति ।

**पदार्थ:** - ये - ये जनाः, असम्भूतिम्अव्यक्तां प्रकृर्तिं (समभवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिः, तस्याः अन्या असम्भूतिः प्रकृतिः कारणमविद्या अव्याकृताख्या ताम्असम्भूतिमव्याकृताख्यां प्रकृतिम्इति आचार्यशङ्करः) कर्मबीजभूतामिति, उपासते सेवन्ते, (ते) — ते जनाः, अन्धं तमः प्राप्नुवन्ति, ये ये जनाः, सम्भूत्यां - अदर्शनात्मकमन्धकारम् अज्ञानं वा, प्रविशन्ति कार्यब्रह्मणि, रताः -- संलग्नाः (मिथ्योपासनायां निरताः), ते ते जनाः, त उ अव्यक्ताप्रकृतेः उपासनातोऽपि, भूयः इव तमः - अधिके -अज्ञानान्धकारे, (प्रविशन्ति)। १२

**शाङ्करभाष्यम् –**

**व्यक्त-अव्यक्तोपासनयो: समुच्चय:**

अधुना व्याकृताव्याकृतोपासनयो:समुच्चिचीषया प्रत्येकं निन्दोच्यते —

**अन्धं तम: प्रविशन्ति ये असम्भूतिं** सम्भवनं सम्भूति:
सा यस्य कार्यस्य सा सम्भूति :
तस्या अन्या **असम्भूति:** प्रकृति: कारणमविद्या अव्याकृताख्या
तामसम्भूतिमव्याकृताख्यां प्रकृतिं
कारणमविद्यां कामकर्मबीजभूताम् अदर्शनात्मिकाम् **उपासते**
ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति ।
**तत:** तस्मादपि **भूयो** बहुतरम् **इव** तम: प्रविशन्ति
य उ **सम्भूत्यां** कार्यब्रह्मणि हिरण्यगर्भाख्ये रता: ।।१२।।

❖❖❖

***अन्यदेवाहुस्संभवा दन्यदाहुरसम्भवात् ।***
***इति शुश्रुम धीराणां ये न स्त(द्वि)द्व्याचचक्षिरे ।। १३ ।।***

**पदच्छेदः** - अन्यत्-एव-आहुः-असंभवात्-अन्यत्-आहुः-असम्भवात्-इति-शुश्रुम-धीराणां-ये-नः-तत्-व्याचचक्षिरे ।

**अन्वयः** - सम्भवात् अन्यदेव (इति) आहुः, नः तत् ये व्याचचक्षिरे (तेषां) धीराणां (उपदेशः) इति शुश्रुम ।

**पदार्थः** - सम्भवात्कार्यब्रह्मणः उपासनाफलम्इति, अन्यत्पृथक् एव आहुः इति वदन्ति, असम्भवात्- अव्यक्तप्रकृतेः कर्मकारणबीजस्य उपासनायाः फलम्इति, अन्यत्-पृथक् आहुः - वदन्ति, इति अवं, धीराणां विदुषां, शुश्रुमः (वचनं) वयं श्रुतवन्वः, ये -ये विद्वांसः आचार्याः, नः अस्माकं कृते, तत् तत्तत्त्वज्ञानं, विचचक्षिरे - व्याख्यातवन्तः ।१ ३

**शाङ्करभाष्यम् –**

व्यक्त-अव्यक्त उपासनयोः फलम्

अधुनोभयोरुपासनयोःसमुच्चयकारणमवयवफलभेदमाह —

**अन्यदेव** पृथगेव **आहुः** फलं **सम्भवात्** सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यं लक्षणं व्याख्यातवन्त इत्यर्थः । तथा च **अन्यदाहुः असम्भवात्** असम्भूतेरव्याकृताद् अव्याकृतोपासनात् ।

यदुक्तमन्धन्तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत **इति** एवं **शुश्रुम धीराणां** वचनं **ये नः तद् विचचक्षिरे** व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ।।१ ३।।

❖❖❖

***सम्भूतिं च विनाशं च यस्तद्वेदोभयँ् सह ।***
***विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ।।१४।।***

**पदच्छेद:** - सम्भूतिं-च-विनाशं-च-य-तत्-वेद-उभयं-सह-विनाशेन-मृत्युं-तीर्त्वा-असम्भूत्या-अमृतम्-अश्नुते ।
**अन्वय:** - य: सम्भूतिं च विनाशं च तदुभयं सह वेद, विनाशेन मृत्युं तीर्त्वा असम्भूत्या अमृतम् अश्नुते ।
**पदार्थ:** - यः यः साधकपुरुषः, तत्सम्भूर्ति तत्कार्यब्रह्म, विनाशं च - तामव्यक्तावस्थां प्रलयावस्थां च, उभयं सह एतत्उभयमेकत्र, वेद जानाति, (सः सः पुरुषः), विनाशेन यस्य कार्यस्य कारणेन सहाभेदः सः विनाश इति तेन, मृत्युं अधर्मकामनादिभिः दोषैः उत्पन्नम्अनैश्वर्यरूपं मृत्युं, तीर्ध्वा अतिक्रम्य, असम्भूत्या -अव्याकृतप्रकृत्या, अमृतम्-प्रकृतिलयलक्षणम् अश्नुते - अवाप्नोति । १४

**शाङ्करभाष्यम् –**

**सम्भूतिं च विनाशं च यस्तद्वेदोभयँ् सह विनाशो** धर्मो यस्य कार्यस्य स **तेन** धर्मिणा अभेदेन उच्यते **विनाश** इति,

तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च **मृत्युं तीर्त्वा**-हिरण्यगर्भोपासनेन हि अणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य **असम्भूत्या** अव्याकृतोपासनया **अमृतं** प्रकृतिलयलक्षणम् **अश्नुते** ।

सम्भूतिं च विनाशं च इत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात् ।।१४।।

## उपासकस्य मार्गयाचना

**भोगमोक्षविवेक:**

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभावं एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तम् ।

तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया तदुक्तं —

विद्यां चाविद्यां च यस्तद्वेदोभयँ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।। इति ।

तत्र केन मार्गेणामृतत्वदेवयानमार्गमश्नुत इत्युच्यते । याचनम् तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयँ सत्यम् । ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण० इति ।।१४।।

❖❖❖

अमृतत्वप्राप्तिमार्गः

***हिरण्मयेन पात्रेण सत्यस्याऽपिहितं मुखम् ।***
***तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।। १५ ।।***

**पदच्छेदः** - हिरण्मयेन-पात्रेण-सत्यस्य-अपिहितं-मुखं-तत्-त्वं-पूषन्-अपावृणु-सत्यधर्माय-दृष्टये ।

**अन्वयः** - सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितम्, हे पूषन्! तं तत् सत्यधर्माय दृष्टये अपावृणु ।

**पदार्थः** - सत्यस्य आदित्यमण्डलस्थस्य, ब्रह्मणः, मुखं द्वारं स्वरूपं वा, हिरण्मयेन ज्योतिर्मयेन, पात्रेण - अपिधानभूतेन आवरकेन वा, अपिहितम्आच्छादितम् हे पूषन्-हे ब्रह्माण्डसकलस्य पोषक परमात्मन् हे मार्गस्य अध्यक्ष वा, सत्यधर्माय - उपासनाधर्मिणे धर्मस्य यथायथानुष्ठात्रे वा, तत्ज्येतिर्मयपात्रेण आच्छादितं सत्यस्य मुखम् अपावृणु - अनावृतम्अनाच्छादितं वा कुरु । १५

**शाङ्करभाष्यम् –**

- हिरण्मयमिव **हिरण्मयं** ज्योतिर्मयमित्येतत् ।
- तेन **पात्रेण** इव अपिधानभूतेन **सत्यस्य**
- एवादित्यमण्डलस्थस्य ब्रह्मणो**ऽपिहितम्** आच्छादितं **मुखं** द्वारम् ।
- **तत्त्वं** हे पूषन् **अपावृणु** अपसारय
- **सत्यस्य** उपासनात्सत्यं धर्मो यस्य मम सोऽहं **सत्यधर्मा**

- तस्मै मह्यम् अथवा यथाभूतस्य धर्मस्य अनुष्ठात्रे
**- दृष्टये** तव सत्यात्मन उपलब्धये ॥१५॥

❖❖❖

***पूषन्नेकर्षे यमसूर्यप्राजापत्य***
***व्यूहरश्मीन् समूह तेजः ।***
***यत्ते रूपं कल्याणतमं तत्ते पश्यामि***
***योऽसावसौ पुरुषः सोऽहमस्मि ॥१६॥***

**पदच्छेदः** - पूषन् एकर्षे-यम-सूर्य-प्राजापत्य-व्यूह-रश्मीन्-समूह-तेजः-यत्-ते-रूपं-कल्याणतमं-तत्-ते-पश्यामि-यः-असौ-असौ-पुरुषः-सः-अहम्-अस्मि ।

**अन्वयः** - (हे) पूषन्! (हे) एकर्षे! (हे) यम! (हे) सूर्य! (हे) प्राजापत्य! रश्मीन् व्यूह, तेजः समूहः, ते यत् कल्याणतमं रूपं (अस्ति) तत् ते (अनुग्रहात्) पश्यामि, यः असौ असौ पुरुषः सः अहम् अस्मि ।

**पदार्थः** - पूषन्हे जगत्पालक आदित्य, एकर्षे हे एकस्मिन्गमनशील, यम - हे जगन्नियामक, सूर्य हे रश्मीनां प्राणानां च संग्राहक, प्राजापत्य हे प्रजापतिपुत्र अथवा जगत्स्रष्टुः सम्बन्धित, रश्मीन्स्वस्य किरणान् व्यूह दूरय, तेजः तव तपकं ज्योतिस्वरूपं, समूह - एकत्रीकृत्य संहर, यत्ते तावकीनं यत् कल्याणतमं - जगदाधारकं जीवषकं कल्याणमयम्अत्यन्तं शोभनं रूपं, तत्ते तावकीनं तत्स्वरूपं, पश्यामि -अवलोकयामि अनुभवामि वा, यः असौ पुरुषः यः असौ आदित्यमण्डलस्थः परमात्मापरमपुरुषः, अहं साधकः, अस्मि भवामि ।१६

**शाङ्करभाष्यम् –**

- हे **पूषन्**! जगतः पोषणात् पूषा रविः ।
- तथैक एव ऋच्छति गच्छति इत्येकर्षिः - हे **एकर्षे**!

- तथा सर्वस्य संयमनाद्यमः - हे **यम**!
- तथा रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्यः - हे **सूर्य**!
- प्रजापतेरपत्यं प्राजापत्यः - हे **प्रजापत्य**!
- **व्यूह** विगमय **रश्मीन्** स्वान् ।
- **समूह** एकीकुरु ।
- उपसंहर ते तेजः तापकं ज्योतिः ।
- **यत्ते** तव **रूपं कल्याणतमम्** अत्यन्तशोभनं,
- **तत्ते** तवात्मनः प्रासादात् **पश्यामि** ।
- किञ्चाहं न तु त्वां भृत्यवद् याचे
- **योऽसौ** आदित्यमण्डलस्थो व्याहृत्यवयवः **पुरुषः**
- पुरुषाकारत्वात् पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति **पुरुषः** - पुरि शयनाद्वा पुरुषः **सोऽहमस्मि** भवामि ।।१६।।

❖❖❖

मरणोन्मुखस्य उपासकस्य प्रार्थना - सूत्रात्मा नामक हिरण्यगर्भेण सह ऐक्यम्

***वायुरनिलममृत मथेदं भस्मान्तं शरीरम् ।***
***ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ।।१७।।***

**पदच्छेदः**- वायुः-अनिलम्-अमृतम्-अथ-इदं-भस्मान्तं-शरीरं-ॐ-क्रतो! स्मर, कृतं-स्मर, क्रतो! स्मर, कृतं स्मर ।

**अन्वयः** - वायुः अमृतम् अनिलम् (प्रतिपद्यतां), (लिङ्गं च इदं ज्ञानकर्मसंस्कृतम् उत्क्रामतु) अथ इदं शरीरं (अग्नौ हुतं) भस्मान्तं (भूयात्), ॐ (हे) क्रतो! स्मर, कृतं स्मर । (हे) क्रतो! स्मर, कृतं

स्मर।

**पदार्थः** - अथ इदानीं मम मरिष्यतः, वायुः प्राणः श्वासवायुः वा, शरीरावच्छेदं परित्यज्य, अमृतं - सूत्रात्मानं, अनिलम्सर्वव्यापकं वायुं (प्राप्येत), इदं शरीरम्इदं पञ्चभूतात्मकं शरीरं, भस्मान्तम्(अन्त्येष्टिसंस्कारे अग्नौ हुतं भूत्वा) भस्मावशेषं भवतीति। क्रतो !- हे संकल्पात्मक मन!, ॐ स्मर परब्रह्मवाचकं प्रणवं स्मर, कृतं बाल्यकालात्आरभ्य इदानीं मृत्युपर्यन्तं यत्कर्मजातं कृतं तत्सर्वं, स्मर स्मरणं कुरु, क्रतो हे संकल्पात्मक मनः, स्मर स्मरणं कुरु, कृतं स्मर कृतकर्माणि स्मरणं कुरु । १७

**शाङ्करभाष्यम् –**

अथेदानीं मम मरिष्यतो **वायुः** प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवतात्मानं सर्वात्मकम् **अनिलममृतं** सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः ।

लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात् ।

**अथेदं शरीरम्** अग्नौ हुतं **भस्मान्तं** भूयात् ।

**ॐ** इति यथोपासनम् ॐप्रतीकात्मकत्वात् सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते ।

हे **क्रतो** सङ्कल्पात्मक स्वर यन्मम स्मर्त्तव्यं तस्य कालोऽयं प्रत्युपस्थितः अतः **स्मर** ।

**क्रतो स्मर कृतं स्मर** इति पुनर्वचनमादरार्थम् ।।१७।।

❖❖❖

उपासकस्य मार्गः

***अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।***
***युयोध्यस्म ज्जुहुराणामेनो भूयिष्ठां ते नम उक्तिं विधेम ।। १८ ।।***

**पदच्छेदः** - अग्ने-नय-सुपथा-राये-अस्मान्-विश्वानि-देव-वयुनानि-विद्वान्-युयोधि-अस्मत्-जुहुराणाम् एनः-भूयिष्ठां-ते-नम-उक्तिं-विधेम ।

**अन्वयः** - (हे) अग्ने! विश्वानि वयुनानि विद्वान् (सन्) (हे) देव! अस्मान् राये सुपथा नय, (किञ्च) जुहुराणम् एनः अस्मत् युयोधि, ते भूयिष्ठां नम उक्तिं विधेम ।

**पदार्थः** - हे अग्ने ! हे तेजस्तत्त्वस्य देव हे यज्ञस्वरूप वा, अस्मान्अस्मान्साधकान् राये - धानाय कर्मफलभोगाय इत्याचार्यशङ्करः मोक्षैश्वर्यप्राप्तये वा, सुपथा - शोभनेन मार्गेण आवागमेन मार्गातिरिक्तेण मार्गेण वा, नय अग्रे सारय, हे देव हे दानशील हे प्रकाशक हे द्योतनशील वा अग्ने, विश्वानि सकलानि, वयुनानि कर्माणि प्रज्ञानानि वा, विद्वान्-जानन् अस्मत्- अस्मदीयं, जुहुराणम्कुटिलं प्रवञ्चनात्मकम् एनः पापं, युयोधि -वियोजय विनाशय इति, ते तव कृते, भूयिष्टां बहुतरां, नम उक्ति नमस्कारवचनं, विधेम - परिचरेम सम्पादयामः इति।

**शाङ्करभाष्यम् –**

पुनरन्येन मन्त्रेण मार्गं याचते —

**हे अग्ने**! **नय** गमय **सुपथा** शोभनमार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय ।

**राये** धनाय कर्मफलभोगायेत्यर्थः, **अस्मान्** यथोक्तधर्मफलविशिष्टान् **विश्वानि** सर्वाणि **हे देव वयुनानि** कर्माणि प्रज्ञानानि वा विद्वान् जानन् ।

किञ्च **युयोधि** वियोजय विनाशय अस्मदस्मत्तो **जुहुराणं** कुटिलं वञ्चनात्मकम् एनः पापम् । ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम् । **भूयिष्ठां** बहुतरां **ते** तुभ्यं **नम उक्तिं** नमस्कारवचनं **विधेम** नमस्कारेण परिचरेम इत्यर्थः ।

ग्रन्थार्थविवेचनम् —

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते (ई०उ० ११) विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते (ई०उ० १४) इति श्रुत्वा केचित्संशयं कुर्वन्ति । अतः तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः ।

तत्र तावत् किं निमित्तः संशय इत्युच्यते ।

विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वञ्च ।

ननु उक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः ।

सत्यम् । विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथाविद्यानुष्ठानं विद्योपासनञ्च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधौ अपि । यथा च न हिंस्यात् सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यतेऽध्वरे पशुं हिंस्यादिति । एवं विद्याविद्ययोरपि स्यात् । विद्याकर्मणोश्च समुच्चयः ।

न; दूरमेते विपरीते विषूची अविद्या या च विद्या (क०उ० १.२.४) इति श्रुतेः ।

विद्यां चाविद्यां चेति वचनादविरोध इति चेत्?

न; हेतुस्वरूपफलविरोधात् । विद्याविद्याविरोधाविरोधयोः विकल्पासम्भवात् समुच्चयविधानादविरोध एवेति चेत्?

न; सहसम्भवानुपपत्तेः ।

क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेत्?

न; विद्योत्पत्तौ अविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः । न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्यया उत्पत्तिर्नापि संशयोऽज्ञानं वा यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः (ई०उ० ७) इति शोकमोहाद्यसम्भवश्रुतेः । अविद्यासम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिम् अवोचाम ।

अमृतमश्नुत इत्यापेक्षिकम् अमृतम् । विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात् । तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिर्व्याख्यात एव मन्त्राणामर्थं इत्युपरम्यते ॥१८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीशङ्करभगवतःकृतावीशावास्योपनिषद्भाष्यं सम्पूर्णम् ।

❖❖❖

## मन्त्राणां वर्णानुक्रमणिका

| **मन्त्राः** | **मन्त्रसंख्या** |
|---|---|
| ०१) असुर्या नाम ते लोका | ३ |
| ०२) अन्धन्तमः प्रविशन्ति | ९ |
| ०३) अन्धं तमः प्रविशन्ति | १२ |
| ०४) अन्यदेवाहुः संभवात् | १३ |
| ०५) अन्यदेवाहुर्विद्यया | १० |
| ०६) अग्ने नय सुपथा राये | १८ |
| ०७) अनेजदेकं मनसो जवीयो | ४ |
| ०८) ॐ ईशावास्यमिदं | १ |
| ०९) कुर्वन्नेवेह कर्माणि | २ |
| १०) तदेजति तन्नैजति तद्दूरे | ५ |
| ११) पूषन्नेकर्षे यमसूर्यप्राजापत्य | १६ |
| १२) यस्तु सर्वाणि भूतानि | ६ |
| १३) यस्मिन्सर्वाणि भूतानि | ७ |
| १४) वायुरनिलममृतमथेदं | १ |
| १५) विद्यां चाविद्यां च यस्त | ११ |
| १६) स पर्यगाच्छुक्रमकायमव्रणं | ८ |
| १७) सम्भूतिं च विनाशं च | १४ |
| १८) हिरण्मयेन पात्रेण सत्यस्य | १५ |

❖❖❖

**१. ईशावास्योपनिषदः शान्तिमन्त्रः कः ?**

उत्तरम् - ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

**२. ईशावास्यादयो मन्त्राः कर्मसु अविनियुक्ताः कथम् ?**

उत्तरम् - ईशावास्यमित्यादयो मन्त्राः कर्मसु अविनियुक्ताः, तेषामकर्मशेषस्यात्मनः याथात्म्यप्रकाशकत्वात् ।

**३. आत्मनः याथात्म्यं कीदृशम् ?**

उत्तरम् - याथात्म्यं च आत्मनः शुद्धत्वापापविद्धत्व-एकत्व नित्यत्वाऽशरीरत्वसर्वगतत्वादि

**४. ईशावास्योपनिषत्सम्बन्धितो वेदः कः ?**

उत्तरम् - शुक्लयजुर्वेदः।

**५. ईशा इति शब्दस्यार्थः कः ?**

उत्तरम् - - **ईशा** ईष्टे इति ईट्, तेन ईशा । ईशिता परमेश्वरः परमात्मा सर्वस्य ।

**६. कर्मणि अधिकारः कस्य वर्तते ?**

उत्तरम् - यो हि कर्मफलेन अर्थी दृष्टेन ब्रह्मवर्चसादिना अदृष्टेन स्वर्गादिना च, द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवान् इति आत्मानं मन्यते सोऽधिक्रियते कर्मसु

**७. एषणा त्रयम् किम् ?**

उत्तरम् - पुत्राद्येषणात्रयम्। यथा - पुत्रेषणा. वित्तेषणा, लोकेषणा।

**८. कस्मात् मा गृधः ?**

उत्तरम् - आत्मन एव इदं सर्वम् आत्मैव च सर्वम्। अतः मिथ्याविषयां गृधिं मा कार्षीः इत्यर्थः।

**९. लोकेऽस्मिन् कथं जिजीविषेत् ?**

उत्तरम् - इह कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत्।शास्त्रविहितानि कर्माणि अग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्।

**१०. नरेण कदा कर्म न लिप्यते ?**

उत्तरम् - इह कर्माणि कुर्वन्नेव शतं समाः जिजीविषेत्, एवं (जिजीविषति) त्वयि नरे कर्म न लिप्यते।

**११. को धर्मः ?**

उत्तरम् - प्रवृत्तिलक्षणो धर्मः।

**१२. द्वाविमावथ पन्थानौ -**

उत्तरम् - द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः।
प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभावितः ।।

**१३. ''न्यासमेवात्यरेचयत्'' इति कुत्र उच्यते ?**

उत्तरम् -''न्यास एवात्यरेचयत्'' इति च तैत्तिरीयके ।

**१४. ये के च आत्महनो जनाः तेषां का गतिः ?**

उत्तरम् - अन्धेन तमसा आवृता लोकाः ते असुर्या नाम, ये के च आत्महनः जनाः, ते प्रेत्य तान् अभिगच्छन्ति ।

**१५. असूर्या नाम का ?**

उत्तरम् - **असूर्या** : परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरा:, तेषाञ्च सम्भूता लोका असुर्यानाम ।

**१६. लोका : के ?**

उत्तरम् - **लोका**: कर्मफलानि । लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि ।

**१७. अविद्वांस : कथं संसरन्ति ?**

उत्तरम् -विद्यमानस्य आत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवति इति प्राकृत-अविद्वांसो जना आत्महन उच्यन्ते । तेन ह्यात्महननदोषेण संसरन्ति ते ।

**१८. आत्मन: स्वरूपं कीदृशम् ?**

उत्तरम् - अनेजत् एकं मनसो जवीय:, एनत् देवा न आप्नुवन् (यत्) पूर्वम् अर्षत्, तत् तिष्ठत् धावत: अन्यान् अत्येति । मातरिश्वा तस्मिन् (सति) अप: दधाति ।

**१९. आत्मन: विशेषणानि अनेजदेकं मनसो इत्यदि मन्त्रे कानि ?**

उत्तरम् -

**२०. अनेजत् शब्दस्यार्थ : क: ?**

उत्तरम् - **अनेजत्** न एजत् । एजृ कम्पने, कम्पनं चलनं स्वावस्थाप्रच्युति: , तद्वर्जितं सर्वदैकरूपमित्यर्थ: ।

**२१. आत्मा कथं मनसो जवीय : ?**

उत्तरम् - इह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेनक्षणमात्राद्भवति इत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्।

**२२. देवाः के ?**

उत्तरम् - द्योतनात् देवाः चक्षुरादीनि इन्द्रियाणि एव

**२३. मनः केभ्यः जवीयः ?**

उत्तरम् - द्योतनात् देवाः चक्षुरादीनि इन्द्रियाणि एव , तत् प्रकृतात्मतत्त्वं न **आप्नुवन्** न प्राप्तवन्तः । तेभ्यो मनो जवीयः।

**२४. आभासमात्रमप्यात्मनः देवविषयी नैव भवति कथम् ?**

उत्तरम् - मनोव्यापारव्यवहितत्वाद् आभासमात्रमपि आत्मनो नैव देवानां विषयी भवति ।

**२५. पूर्वमर्षत् शब्दस्यार्थः कः ?**

उत्तरम् - पूर्वमेव गतं व्योमवत् व्यापित्वात् ।

**२६. मातरिश्वा शब्दस्यार्थः कः ?**

उत्तरम् - मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः।

**२७. तदेजति तन्नैजति इति पूर्णं श्लोकं लिखत।**

उत्तरम् - तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य त दु सर्वस्यास्य बाह्यतः ।।

**२८. आत्मनः दूरत्वं कथम् ?**

उत्तरम् - वर्षकोटिशतैः अपि अविदुषाम् अप्राप्यत्वाद् दूर इव आत्मनः दूरत्वम्।

**२९. आत्मा केन प्रकारेण अन्तिके भवति ?**

उत्तरम् - विदुषामात्मत्वात् अन्तिके।

**३०. कदा प्राणी न विजुगुप्सते ?**

उत्तरम् - यस्तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति । सर्वभूतेषु च आत्मानं अनुपश्यति। ततः (सः) न विजुगुप्सते ।

**३१. विजुगुप्सा का ?**

उत्तरम् - विजुगुप्सा घृणा।

**३२. कदा शोकमोहातीतो भवति जीवः ?**

उत्तरम् - यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।

**३३. शोकमोहौ कस्य कार्यभूतौ ?**

उत्तरम् - शोकश्च मोहश्च कामकर्मबीजम् अजानतो भवति ।

**३४.पर्यगात्,शुक्रम्,अकायम्, अव्रणम्, कविः, मनिषी, परिभूः, स्वयम्भूः इत्येतेषाम् अर्थान् लिखत ।**

उत्तरम् -

- **पर्यगात्** - परि समन्तात् अगात् गतवान् आकाशवद् व्यापी इत्यर्थः
- **शुक्रं** शुद्धं ज्योतिष्मत् दीप्तिमान् इत्यर्थः ।
- **अकायम्** अशरीरो लिङ्गशरीरवर्जित इत्यर्थः ।
- **अव्रणम्** अक्षतम् ।
- **अस्नाविरं** स्नावाः शिरा यस्मिन् न विद्यन्त इति अस्नाविरम् ।

- **अव्रणम् अस्नाविरम्** इत्यभ्यां स्थूलशरीरप्रतिषेधः ।

- **शुद्धं** निर्मलं अविद्यामलरहितम् इति कारणशरीरप्रतिषेधः ।

- **अपापविद्धं** धर्माधर्मादिपापवर्जितम् ।

- **कविः** क्रान्तदर्शी सर्वदृक्। नान्योऽतोऽस्ति द्रष्टा (बृ०उ० ३-८-११) इत्यादि श्रुतेः ।

- **मनीषी** मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः ।

- **परिभूः** सर्वेषां पर्युपरि भवतीति पर्यभूः ।

- **स्वयम्भूः** स्वयमेव भवतीति । येषामुपरि भवति यश्चोपरि भवति। स सर्वः स्वयमेव भवतीति स्वयम्भूः ।

**३५. अविद्या का?**

उत्तरम् - विद्याया अन्या अविद्या कर्मेत्यर्थः, कर्मणो विद्याविरोधित्वात्। अविद्या - कर्माणि- अग्निहोत्रादिलक्षणानि।

**३६. का विद्या?**

उत्तरम् - विद्या -देवताज्ञानम्।

**३७. अविद्योपासकानां का गतिः भवति?**

उत्तरम् - **अन्धन्तमः** अदर्शनात्मकं तमः प्रविशन्ति ये अविद्योपासका भवन्ति।

**३८. विद्यारतानां को वा मार्गः?**

उत्तरम् - कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रताः अभिरताः ते अन्धत्मकात्तमसो भूय इव बहुतरमेव
ते तमः प्रविशन्ति।

**३९. याथातथ्यत:—अर्थ:**

उत्तरम् - **याथातथ्यत:** सर्वज्ञत्वाद्यथा तथाभावो याथातथ्यं - तस्माद्यथाभूतकर्मफलसाधनत: ।

**४०. अविद्यया कीदृशस्य मृत्यो: तरणं भवति?**

उत्तरम् - स्वाभाविकं कर्म ज्ञानं च, मृत्युशब्दवाच्यस्योभयस्य तरणं भवति अविद्यया।

**४१. विद्या -अविद्याभ्यां किं लभ्यते ?**

उत्तरम् - विद्यां चाविद्यां च यस्तद्वेदोभयँ् सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।

**४२. विद्यया किमश्नुते?**

उत्तरम् -**विद्यया** देवताज्ञानेन **अमृतं** देवतात्मभावम् **अश्नुते** ।

**४३. का सम्भूति: का च असम्भूति: ?**

उत्तरम् - सम्भवनं सम्भूति: , सा यस्य कार्यस्य सा सम्भूति : । तस्या अन्या **असम्भूति:** प्रकृति: कारणमविद्या अव्याकृताख्या ।

**४४. सम्भवादसम्भवाच्च किं फलं निर्दिष्टम्?**

उत्तरम् - **सम्भवात्** सम्भूते: कार्यब्रह्मोपासनादणिमाद्यश्वैर्यं लक्षणं, **असम्भवात्** असम्भूतेरव्याकृताद् अव्याकृतोपासनात् । यदुक्तमन्धन्तम: प्रविशन्तीति प्रकृतिलय इति ।

**४५. सम्भूतिविनाशयो: विज्ञानफलं कीदृशम्?**

उत्तरम् - हिरण्यगर्भोपासनेन हि अणिमादिप्राप्ति: फलम्,

तेनानैश्वर्यादिमृत्युमतीत्य **असम्भूत्या** अव्याकृतोपासनया **अमृतं** प्रकृतिलयलक्षणम् **अश्नुते** ।

**४६. प्रवृत्तिलक्षणस्य वेदार्थस्य कुत्र उपयोगः ?**

उत्तरम् - विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने उपयोगः।

**४७. आदित्यमण्डलस्थस्य पुरुषस्य रूपं कीदृशम् ?**

उत्तरम् - हिरण्मयमिव **हिरणमयं** ज्योतिर्मयमित्येतत् । तेन **पात्रेण** इव अपिधानभूतेन **सत्यस्य** - एवादित्यमण्डलस्थस्य ब्रह्मणोऽ**पिहितम्** आच्छादितं **मुखं** द्वारम् ।

**४८. कः पूषा ? सूर्यः कः ?**

उत्तरम् - जगतः पोषणात् पूषा रविः ।रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्यः ।

**४९. एकर्षि इत्यस्यार्थः ? कश्च यमः ?**

उत्तरम् - एक एव ऋच्छति गच्छति इत्येकर्षिः। सर्वस्य संयमनाद्यमः।

**५०. पुरुषः कः ?**

उत्तरम् -पुरुषाकारत्वात् पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति **पुरुषः**- पुरि शयनाद्वा पुरुषः ।

**५१. क्रतो स्मर कृतं स्मर -अर्थः।**

उत्तरम् - **क्रतो** सङ्कल्पात्मक स्वर यन्मम स्मर्त्तव्यं तस्य कालोऽयं प्रत्युपस्थितः अतः **स्मर** ।

**५२. क्रतो स्मर इति द्विवारं किमर्थम् ?**

उत्तरम् - **क्रतो स्मर कृतं स्मर** इति पुनर्वचनमादरार्थम् ।

**५२. सुपथा शब्दस्यार्थ: क: ?**

उत्तरम् - **सुपथा** शोभनमार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुन: पुनर्गमनागमन-वर्जितेन शोभनेन पथा नय ।

**५३. विश्वानि देव ?**

उत्तरम् - विश्वेदेवा:, विश्वानि - सर्वाणि।

**५४. वयुनानि ?**

उत्तरम् - कर्माणि प्रज्ञानानि वा।

**५५. जुहुराणमेन: किम् ?**

उत्तरम् - **जुहुराणं** कुटिलं वञ्चनात्मकम् एन: पापम् ।

**५६. नम उक्तिं किमर्थं विधीयते ?**

उत्तरम् - वयं विशुद्धा: सन्त इष्टं प्राप्स्याम इत्यभिप्राय: । किन्तु वयमिदानीं ते न शक्नुम: परिचर्यां कर्तुम् । भूयिष्ठां बहुतरां **ते** तुभ्यं **नम उक्तिं** नमस्कारवचनं **विधेम** नमस्कारेण परिचरेम इत्यर्थ: ।

**५७. राये शब्दस्यार्थ: क: ?**

उत्तरम् - **राये** धनाय कर्मफलभोगायेत्यर्थ:।

**५८. कति मन्त्रा: ईशोपनिषदि सन्ति ?**

उत्तरम् - १८ अष्टादश मन्त्रा:।

**५९. ईशोपनिषदः अद्वैतमतभाष्यकारः कः?**

उत्तरम् - भगवान् शङ्कराचार्यः।

**६०. माध्यन्दीनसंहितायाः कतम अध्यायः ईशोपनिषद् ?**

उत्तरम् - चत्वारिंशत्तमः अध्यायः ईशोपनोषद्।